International Journal of Sanskrit Research 2018; 4(4): 18-19

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(4): 18-19
© 2018 IJSR
www.anantaajournal.com
Received: 06-05-2018
Accepted: 07-06-2018

**Shanto Sarkar**
Guest Lecturer, Dept. of Sanskrit, Falakata College, West Bengal India

**Correspondence**
**Shanto Sarkar**
Guest Lecturer, Dept. of Sanskrit, Falakata College, West Bengal India

# मृच्छकटिकम् प्रकरणे गणिकानां वंचना तथा दानमहिमा

**Shanto Sarkar**

**प्रस्तावना**

गणिका शब्दस्य व्युत्पत्तिः गण + ष्णिक् + आप् = गणिका (स्त्रीलिङ्गे) । गणिका शब्दस्य समार्थक – शब्द – समूहः यथा – वेश्या, हस्तिनी, यूथिकापुष्पम्, प्रभृतयः । गण + एरू = गणेरू शब्दस्य अर्थः वेश्या, गणेरू – कै + क + टाप् = गणेरूका शब्दस्य अर्थः कुट्टनी, वारवणिता, वाराङ्गना ।

गणिका शब्दस्य पूर्वरूपं प्राप्स्यामि भरतस्य नाट्यशास्त्रस्य प्रथमाध्याये । अप्सरसां सृष्टेः प्रयोजनं भरतमुनिप्रणीतस्य नाट्यशास्त्रस्य प्रथमाध्याये चर्चितस्य कैशिकी वृत्ति – निरूपण – प्रसङ्गात् समुद्भतोऽस्ति ।

भारती–साक्त्वती – आरभटीवृत्तीनां प्रयोगस्य ब्रह्मणे सूचनानन्तरं तदुपदेशेन कैशिकीवृत्त्याः प्रयोगविषये यासां सामग्रीणामपेक्षाऽभूत्तस्याः नृत्तादिसमाचरणाये स्त्रीसमूहस्यापि आवश्यकता विद्यते, तत्पूरणायाप्सरसां सृष्टिः विधात्रा करोति । तद्यथा –

> ततोऽसृजन् महातेजा मनसाऽप्सरसो विभुः ।
> नाट्यालङ्कारचतुराः प्रादान् मह्यं प्रयोगतः ।।

अथति् ततः महातेजा विभुः मनसा अप्सरसः असृजत्, ताः नाट्यालंकारचतुराः प्रयोगतः मह्यं प्रादात् ।

> तदाप्रभृति नाट्यप्रयोगेष्वप्सरसः प्रयुत्ता अभवन् ।
> एतदेवाप्सरसां सृष्टेः प्रयोजनम् ।
> अप्सरसां तासां नामानि –
> मजुंकेशीं सुकेशीं च मिश्रकेशीः सुलोचनाम् ।
> सोदामिनीं देवदत्तां देवसेनां मनोरमाम् ।।
> सुदतीं सुन्दरीं चैव विदग्धां विवुधां तथा ।
> सुमालां सन्ततिं चैव सुनन्दां सुमुखीं तथा ।।
> मागधीमर्जुनीं चैव सरलां केरलां धृतिम् ।
> नन्दां सुपुष्कलां चैव कलभां चैव मे ददौ ।।

उपरोक्ताः चर्तुविंशतिसङ्ख्यका अप्सरसः मुनये भरताय नाट्यविद्या प्रवर्तको ब्रह्मा ददाविति ।

धनंजयस्य दशरूपके प्रकरणस्य नायिका प्रसङ्गे – गणिका तथा वेश्या कन्यायाः वर्णना अस्ति । विश्वनाथ–कविराजः महोदयेन साहित्य – दर्पणस्य षष्टपरिच्छेदे तदैव नायिकायाः वर्णना प्रदत्तवान्।

> ''नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्'' ।

शुद्रकः विरचितः मुच्छकटिकम् इति प्रकरणस्य प्रथमाङ्के वेश्यापल्लयाः कन्या वसन्तसेना प्रसङगे राजश्यालकः शकारः उक्तम् – धनापहारि, चौर्यगणस्य, कामनारिनी, कुलकलङ्किणी, मत्सभक्षिका, क्षुद्रनासिका, नर्त्तकी, अनायत्ता, कामदेवस्य लीलाभूमि, सुकेशधारिणी, वेश्याकुलकामिनी, वेश्यापल्ल्या–वासिनी च दश स्तुतयः अकरोत् ।

मृच्छकटिके वर्णितः विटस्य उक्तिर्माध्यमेन सुस्पष्टं यत् – वेश्यानां विक्रीतद्रव्यः धनलभ्येन च एव दिनयापनं अकरोत् । कः प्रियः कः अप्रियः तदैव विवेचना वेश्या रमणीनां न आसीत् । तासां रमणीनां सर्वेषामेव समभावे स्नेहं प्रदर्शनं अत्यावश्यकम् आसीत् ।

मृच्छकटिकम् प्रकरणस्य प्रथमांके विटस्य स्वस्य उक्तिर्माध्यमेन स्पष्टं यत् – वसन्तसेना वेश्या कन्या भूत्वापि कदापि असत् जनस्य सेवां न कर्तुमिच्छति । वसन्तसेना केवलं सत् ब्रह्मण – चारूदत्तं प्रति आकृष्टा आसीत् ।

मृच्दकटिकस्य चतुर्थाङ्के वसन्तसेनायाः उक्तिर्माध्यमेन स्पष्टं यत् – वेश्या रमण्य नाना सदसज्जनेन सह अलीक – चाटुकारे पारदर्शिणी आसन् ।

कविदण्डिना विरचितः दशकुमारचरितस्य मध्ये वारवनितानां स्वजात्याः कर्त्तव्य–कम–वर्णना माध्यमेन नृत्यगीतं, वचनकौशलं, क्रीडाकौशलं, शब्द–विद्या, दूतकला, साजसज्जा विद्या प्रभृतयः गुप्त – छला –कौशलादि विद्या–दक्षतायाः पूर्णपरिचयं प्राप्सामः ।

मृच्छकटिकस्य चतुर्थाङ्के वर्णितोऽस्ति वेशया रमणी अर्थोपार्जने हास्य–क्रन्दनं, विश्वासोत्पादने कृत्तिम–भावप्रदर्शनं, वेश्या रमण्यः सदा सागरः तरङ्गेव, वेश्या रमण्यः कदापि विशुद्धः न भवन्ति । परन्तु वेश्या कन्या वसन्तसेना एका भिन्न–चरित्रा । सा कदापि स्वेच्छा विरूध्यकर्माणि न करोति । तस्याः स्वधर्मः लंघनं तथा मात्रादों लङ्घनं, राजश्यालकस्य कर्णीरथः ग्रहणं, दश – सहस्र–मूल्यस्य अलकांर – लङ्घनं माध्यमेन स्वस्य स्वातन्त्रयता प्रयोग–क्षमता लक्ष्यते ।

मृच्छकटिकस्य प्रकरणस्य चतुर्थाङ्के वसन्तसेनायाः गृहस्य अष्टप्रकोष्टयुक्त – गृहवर्णना – माध्यमेन गणिकानां अर्थवृद्धिः, नाना काम – कलापानि विद्यायाः ज्ञानं लक्ष्यते ।

अष्टमाङ्कें वसन्तसेना राजशाकारस्य प्रणयवार्त्ता लङ्घनार्थे कण्टावरोधं माध्यमेन स्पष्टं यत् यदि काऽपि गणिका प्रणय–निवेदनं प्रत्याख्यानं करोति चेत् तस्याः मृत्युरपि अनिवार्यमासीत् ।

मृच्छकटिकस्य गणिकानां समाजे वौद्ध–धर्मोपसनापि आसीत् । मृच्छकटिके प्रकरणे चतुर्थाङ्के वेश्या, दासी महनिकायाः प्राप्तः 'वधूः' शब्दः गणिकानां मध्यो अतिदुर्लभः आसीत् । अष्टमाङ्के तथा वहवः स्थानेषु गणिकानां दास्याः पुत्रि ! सम्बोधनं अतीव वचंनायाः दृश्यम्। मृच्छकटिकं प्रकरणे गणिकानां मध्ये मातृस्नेहमयी दृश्यं अतीव जगत् कल्याणकरम् ।

मानवानां धर्मकार्यार्थे यादृशाः उपदेशाः ऋषयः प्रदत्तवन्तः तेषां मध्ये दानम् हि प्रधानः । 'दानम्' शब्दस्य व्युत्पत्तिः (दा+ल्युट् = दानम् (क्लीवलिङ्गे) । यस्य अर्थः – वितरणम् । दान – कर्मे मुख्यरूपे चतस्त्रः तत्वानि प्राधान्यानि यथा – दाता, प्रति ग्रहीता, प्रदेयवस्तुः फलंच । एतेषां दानकर्मस्य महिमा विशेषः । धर्मशास्त्रकारः मनुना उक्तम् – कृतयुगे (सत्ययुगे) तपः, द्वापरयुगे ज्ञानम्, कलियुगे दानम्, एवं धार्मिकः जीवन–यापनम् ।

"तपः परं कृतयुगे त्रेतायां जानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ।"

मृच्छकटिकम् प्रकरणे, भारतीय साहित्ये तथा विश्वसाहित्ये दातमहिमा अतीव उज्ज्वला । शूद्रकेन रचितः मृच्छकटिकम् प्रकरणे गणिका तथा वेश्याकन्या वसन्तसेनया दूतक्रीडया पराजितः संवाहकस्य दशमोहरस्य ऋणं कौशलेन स्वहस्त–वलयं प्रदानं कृत्वा संवाहकं मोचयति । एतादृशं कार्यं अवश्यमेव गणिकया तथा गणिका वसन्तसेनायाः दानमहिमा । मृचकटिकस्य चतुर्थाङ्कात् ज्ञातुं शक्नुमः यत् गण्किा कन्या वसन्तसेनायाः दासी मदनिकां प्रति शर्विलकस्य एकाग्रानुरागं ज्ञात्वा शर्निलकस्य हस्ते मदनिकाम् अर्पयति ।

मृच्छकटिकम् प्रक्रणे वसन्तसेनया क्रन्दनरतः चारूदत्तस्य पुत्रः रोहसेनस्य क्रन्दनदुरीकरणार्थं मृत्तिका–निर्मित–शकटस्य उपरि मातृस्नेहवशतः (दयावशतः) तस्याः सर्वालङ्कार – भूषणानि स्थापितवती । पतादृशी दानमहिमा तथा मातृस्नेहमयी दुश्यम् अवश्यमेव प्रशंसितम् ।

## सन्दर्भ–सूची


1. Sanskrit Bengali Dictionary. Sri Ashok Kumar Banerjee, Balaram Publication, Kolkata, 6, 165.
2. Bharat Natyashastra. Dr. Suresh Chandra Bandopadhyay & Dr. Chanda Chakraborty, Nabapatra Publication, Kolkata. I(73):7-8.
3. UGC. Sanskrit, Priyanka Tiwary, Arihant Publicationm, 419.
4. Mricchakatika by Satya Ranjan Bandapadhyay, Sades Publication Kolkata, 6, 23, 36, 90,128, 139 & 270.
5. Sahitya Darpana. Prof. Uday Bandapadhyay, Sanskrit Book Depo, Kolkata, 6:137.
6. Manusamhita. Suresh Chandra Bandapadhyay, Ananda Publication, Kolkata, 14:52.